# ४ नीतिवचनानि

प्राचीन आचार्यों ने अपने अनुभवों एवं जीवन-मूल्यों को संक्षिप्त, सरल तथा प्रभावशाली वचनों के माध्यम से प्रस्तुत किया है, जिन्हें नीतिवचन कहा जाता है। प्रस्तुत पाठ 'नीतिवचनानि' के श्लोक मुख्यतः नारायणपण्डितरचित *हितोपदेश* तथा भर्तृहरि-प्रणीत *नीतिशतकम्* से संकलित हैं।

Ancient scholars expressed their wisdom, experiences and life lessons through concise and meaningful sayings known as Nîtivacanas (moral maxims). The lesson 'Nîtivacanãni' is mainly compiled from two renowned Sanskrit works—*Hitopadeś* by Narayanpandit and *Nîtiśatakam* by Bhartrhari.

© NCERT not to be republished

सम्पत्तौ च विपत्तौ च महतामेकरूपता।
उदये सविता रक्तो रक्तश्चास्तमये यथा ॥१॥



**पदच्छेदः**

सम्पत्तौ च विपत्तौ च महताम् एकरूपता उदये सविता रक्तः रक्तः च अस्तमये रक्तः च यथा

**अन्वयः**

यथा सविता उदये रक्तः अस्तमये च रक्तः (भवति), तथा महतां सम्पत्तौ च विपत्तौ च एकरूपता (भवति)।

**भावार्थः**

यथा सूर्यः उदयकाले रक्तवर्णः भवति, अस्तसमयेऽपि रक्तवर्णः एव दृश्यते, (तथा) एवं प्रकारेण महात्मानः सज्जनाश्च सम्पत्तिकाले विपत्तिकाले स्वभावे, आचरणे च समानाः एव भवन्ति। ते सुखदुःखयोः प्रभावेण न परिवर्तन्ते।

**यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता।**
**एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥२॥**





**पदच्छेदः**

यौवनम् धनसम्पत्तिः प्रभुत्वम् अविवेकिता एकैकम् अपि अनर्थाय किम् उ यत्र चतुष्टयम्।

© NCERT not to be republished





**अन्वयः**

यौवनम्, धनसम्पत्तिः, प्रभुत्वम्, अविवेकिता च एतेषु एकैकम् अपि अनर्थाय भवति; यत्र चतुष्टयम् (तत्र) किमु (कथनीयम्)?

**भावार्थः**

यौवनं, धनसम्पत्तिः, प्रभुत्वम् अविवेकिता च एतानि चत्वारि मनुष्यस्य पतनकारणानि भवन्ति। एतेषु एकैकम् अपि महत् अनर्थं जनयति। यदा एतानि चत्वारि एकत्र भवन्ति, तदा तस्य जनस्य विनाशः निश्चितः एव भवति।

**दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।**
**देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥३॥**

**पदच्छेदः**

दातव्यम् इति यत् दानम् दीयते अनुपकारिणे देशे काले च पात्रे च तत् दानम् सात्त्विकम् स्मृतम्

**अन्वयः**

दातव्यमिति यत् दानम् अनुपकारिणे देशे काले च पात्रे च दीयते, तत् दानम् सात्त्विकम् स्मृतम्।

© NCERT not to be republished




**भावार्थः**


यत् दानं कर्तव्यबुद्ध्या, प्रत्युपकारस्य अपेक्षां विना, योग्ये देशे, उचिते काले, सुपात्राय च दीयते, तत् दानं सात्त्विकदानम् इति विद्वद्भिः स्मृतम्। एतादृशं दानं शुद्धभावेन लोककल्याणाय क्रियते।

**त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।**
**ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥४॥**

© not to be republished







**पदच्छेदः**

त्यजेत् एकम् कुलस्य अर्थे ग्रामस्य अर्थे कुलम् त्यजेत् ग्रामम् जनपदस्य अर्थे आत्मार्थे पृथिवीम् त्यजेत्

**अन्वयः**

कुलस्य अर्थे एकं त्यजेत्। ग्रामस्य अर्थे कुलं त्यजेत्। जनपदस्य अर्थे ग्रामं त्यजेत्। आत्मार्थे पृथिवीं त्यजेत्।


**भावार्थः**

यदि कुलस्य हिताय आवश्यकता भवेत् तर्हि एकं जनं त्यजेत्। ग्रामस्य हिताय कुलमपि त्यजेत्। जनपदस्य हिताय ग्रामं त्यजेत्। आत्मनः रक्षणार्थं तु सम्पूर्णां पृथिवीमपि त्यजेत्।

**मित्रद्रोही कृतघ्नश्च यश्च विश्वासघातकः।**
**ते नराः नरकं यान्ति यावच्चन्द्रदिवाकरौ ॥५॥**







© NCERT not to be republished

**पदच्छेदः**

मित्र-द्रोही कृतघ्नः च यः च विश्वास-घातकः ते नराः नरकम् यान्ति यावत् चन्द्र-दिवाकरौ।

**अन्वयः**

यः मित्रद्रोही, कृतघ्नः च, विश्वासघातकः च (भवति), ते नराः चन्द्रदिवाकरौ यावत् नरकं यान्ति।

**भावार्थः**

ये जनाः मित्रं प्रति द्रोहं कुर्वन्ति, उपकारिणं प्रति कृतज्ञतां न ज्ञापयन्ति, विश्वासघातं कुर्वन्ति, ते पापिनः जनाः यावत् चन्द्रः सूर्यश्च विद्येते तावत् नरके दुःखानि अनुभवन्ति च।

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| यौवनम् | तारुण्यम् | युवावस्था | Youth | |
| धनसम्पत्तिः | वित्तसमृद्धिः | धन-संपत्ति | Wealth, Prosperity | |
| प्रभुत्वम् | आधिपत्यम् | अधिकार, शासन | Authority Rashness | |
| अविवेकिता | अविचारिता | विवेक का अभाव | Lack of wisdom | |
| अनर्थाय | अहिताय | हानि के लिए | For harm | |
| दानम् | प्रदानम् | दान | Charity | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| अनुपकारिणे | अप्रत्युपकारिणे | जो बदले में उपकार न करे | To one who cannot repay | |
| देशे | स्थाने | स्थान में | Place | |
| काले | समये | समय पर | Time | |
| पात्रे | योग्यजने | योग्य व्यक्ति में | Worthy person | |
| सात्त्विकम् | सत्त्वगुणयुक्तम् | सत्त्वगुण से युक्त | Pure, Virtuous | |
| कुलम् | अभिजनः | वंश | Family, Lineage | |
| ग्रामः | जनवसतीः | गाँव | Village | |
| मित्रद्रोही | मित्रद्वेषी | मित्र से विश्वासघात करने वाला | Betrayer of a friend | |
| कृतघ्नः | उपकारघातकः | उपकार न मानने वाला | Ungrateful person | |
| विश्वासघातकः | विश्वासहन्ता | विश्वास तोड़ने वाला | Traitor | |
| सम्पत्तौ | समृद्धौ | समृद्धि में | In prosperity | |
| विपत्तौ | सङ्कटे | विपत्ति में | In adversity | |
| महताम् | सज्जनानाम् | महान व्यक्तियों का | Of great persons | |

© NCERT not to be republished

## अत्र इदम् अवधेयम्

**१. कर्मवाच्ये / भाववाच्ये क्रियापदानाम् उदाहरणानि पश्यत—**

| | | |
|---|---|---|
| दीयते | – | दिया जाता है। |
| पठ्यते | – | पढ़ा जाता है। |
| लिख्यते | – | लिखा जाता है। |
| कथ्यते | – | कहा जाता है। |
| श्रूयते | – | सुना जाता है। |
| दृश्यते | – | देखा जाता है। |
| खाद्यते | – | खाया जाता है। |
| पीयते | – | पिया जाता है। |
| गम्यते | – | जाया जाता है। |
| सेव्यते | – | सेवन किया जाता है |

**कर्मवाच्ये / भाववाच्ये वाक्यप्रयोगं पश्यत—**

| | | |
|---|---|---|
| मया पुस्तकं पठ्यते | – | मेरे द्वारा पुस्तक पढ़ी जाती है। |
| मया पत्रं लिख्यते | – | मेरे द्वारा पत्र लिखा जाता है। |
| मया जलं पीयते | – | मेरे द्वारा जल पिया जाता है। |
| मया फलं खाद्यते | – | मेरे द्वारा फल खाया जाता है। |
| मया सत्यं कथ्यते | – | मेरे द्वारा सत्य कहा जाता है। |

© NCERT not to be republished



२. 'नञ् तत्पुरुषः' तत्पुरुषसमासस्य एकः भेदः अस्ति। अस्मिन् समासे पूर्वपदं 'नञ्' (न/अन्) भवति। यदि उत्तरपदे व्यञ्जनं भवति तर्हि 'न' इत्यस्य स्थाने 'अ' आदेशः भवति यदि स्वरः भवति तर्हि 'अन्' इति आदेशः भवति।

यथा—

| | | |
|---|---|---|
| अक्रोधः | – | न क्रोधः |
| असाधुः | – | न साधुः |
| असत्यम् | – | न सत्यम् |
| अनृतं | – | न ऋतम् |
| अनिष्टम् | – | न इष्टम् |
| अनीश्वरः | – | न ईश्वरः |
| अनुपकारिणे | – | न उपकारिणे |

© NCERT not to be republished

## वयम् अभ्यासं कुर्मः

१. एकपदेन उत्तरत—

क. यौवनं धनसंपत्तिः प्रभुत्वम् अविवेकिता च किमर्थं भवन्ति?

ख. सात्त्विकं दानं कस्मै दीयते?

ग. ग्रामस्यार्थे किं त्यजेत्?

घ. मित्रद्रोही कुत्र गच्छति?

ङ. सम्पत्तौ विपत्तौ च केषाम् एकरूपता भवति?

## २. पट्टिकातः चित्वा रिक्तस्थानानि पूरयत—

**पट्टिकातः—** अविवेकिता, अनुपकारिणे, आत्मार्थे, अस्तमये, नरकं

क. यौवनं धनसंपत्तिः प्रभुत्वम् ........................।

ख. दातव्यमिति यद्दानं दीयते ........................।

ग. ग्रामं जनपदस्यार्थे ........................ पृथिवीं त्यजेत्।

घ. ते नराः ........................ यान्ति।

ङ. उदये सविता रक्तः रक्तश्च ........................ यथा।

## ३. श्लोकांशान् मेलयत—

| | |
|---|---|
| क. यौवनं धनसम्पत्तिः | १. महतामेकरूपता |
| ख. दातव्यमिति यद्दानम् | २. यश्च विश्वासघातकः |
| ग. त्यजेदेकं कुलस्यार्थे | ३. ग्रामस्यार्थे कुलं त्यजेत् |
| घ. मित्रद्रोही कृतघ्नश्च | ४. दीयतेऽनुपकारिणे |
| ङ. सम्पत्तौ च विपत्तौ च | ५. प्रभुत्वमविवेकिता |



## क्रियाकलापः

१. विद्यार्थिनः स्वगृहात् लेखनीम्, अभ्यासपुस्तिकां, पुस्तकं च आनयेयुः। तानि आवश्यकतानुसारं अन्यछात्रेभ्यः यच्छेयुः। अनन्तरं दानस्य अनुभवं स्वशब्दैः संस्कृतेन लिखेयुः।

२. सर्वे छात्राः स्फोरकपत्रे एकं वृक्षं चित्रयन्तु। तस्य शाखासु एतानि मूल्यानि लिखन्तु—

सत्यम्

कृतज्ञता

मित्रता

सहयोगः

विश्वासः

३. छात्राः समूहेषु समाजहिताय त्यागं कृतवतः महापुरुषान् अन्विष्यन्तु।

**यथा** — सुभाषचन्द्रबोसः, महात्मागान्धी इत्यादयः।

© NCERT not to be republished